# Purushottamaproktam Sarvadevadi Stotram

# પુરુષોત્તમપ્રોક્તં સર્વદેવાદિસ્તોત્રમ્

## Document Information

Text title : Purushottamaproktam Sarvadevadi Stotram

File name : puruShottamaproktaMsarvadevAdistotram.itx

Category : deities_misc, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 95/13-33||

Latest update : February 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2026

*sanskritdocuments.org*

# પુરુષોત્તમપ્રોક્તં સર્વદેવાદિસ્તોત્રમ્

મુક્તાનાં મણ્ડલૈઃ સાકં વિહિતં વાઙ્મયં તદા ।
યદાઽહમગમં સૃષ્ટૌ ત્વયા સાકં તુ પદ્મજે ॥ ૧૩॥

“નમઃ શ્રીપરમેશાય નમોઽક્ષરાધિપાય ચ ।
નમો મુક્તાધિનાથાય નમો બ્રહ્મપ્રિયાજુષે ॥ ૧૪॥

હરિપ્રિયાદિપતયે નમો નમોઽવતારિણે ।
નમોઽનાદિકૃષ્ણનારાયણાય પરમાત્મને ॥ ૧૫॥

નમ ઈશ્વરનાથાયેશ્વરિણીસ્વામિને નમઃ ।
નમો વ્યૂહાધિનાથાય વૈષ્ણવીસ્વામિને નમઃ ॥ ૧૬॥

નમો નારાયણીશાય શ્રીલક્ષ્મીશાય તે નમઃ ।
નમોઽન્તર્યામિણે વેદનિધયે તે નમો નમઃ ॥ ૧૭॥

નમઃ સહસ્રશીર્ષાયાઽસઙ્ખ્યનામ્ને ચ તે નમઃ ।
વિષ્ણવે શમ્ભવેઽજાય ત્રિરૂપાય ચ તે નમઃ ॥ ૧૮॥

આદિત્યેભ્યો નમશ્ચાપિ વસુભ્યશ્ચ નમો નમઃ ।
અશ્વિભ્યાં ચ નમઃ સર્વસુરેભ્યશ્ચ નમો નમઃ ॥ ૧૯॥

યજ્ઞદેવેભ્ય એવાઽપિ કાલાય મૃત્યવે નમઃ ।
વિશ્વદેવેભ્ય એવાપિ પિતૃભ્યશ્ચ નમો નમઃ ॥ ૨૦॥

સિદ્ધેભ્યશ્ચ મુનિભ્યશ્ચ સાધુભ્યશ્ચ નમો મુહુઃ ।
ગણેશ્વરેભ્યઃ સર્વેભ્યઃ પાર્ષદેભ્યો નમો નમઃ ॥ ૨૧॥

સાધ્વીભ્યશ્ચ સતીભ્યશ્ચ દેવીભ્યશ્ચ નમો નમઃ ।
માતૃભ્યશ્ચ જનકેભ્યો વૃદ્ધેભ્યશ્ચ નમો નમઃ ॥ ૨૨॥

વિપ્રેભ્યઃ પૂજ્યવર્ગેભ્યસ્તીર્થેભ્યશ્ચ નમો નમઃ ।
કમ્ભરાયૈ મહાલક્ષ્મ્યૈ સન્તુષ્ટાયૈ નમો નમઃ ॥ ૨૩॥

માણિક્યાયૈ પ્રભાવત્યૈ પ્રજ્ઞાયૈ ચ નમો નમઃ ।
લક્ષ્મ્યૈ શ્રિયૈ રાધિકાયૈ કમલાયૈ નમો નમઃ ॥ ૨૪॥

શ્રીમદ્ગોપાલકૃષ્ણાય તે મહાવિષ્ણવે નમઃ ।
સપ્તર્ષિભ્યો માનવેભ્યો બ્રાહ્મણેભ્યો નમો નમઃ ॥ ૨૫॥

ચમત્કારિપુરુષેભ્યઃ સદ્ગુરુભ્યો નમો નમઃ ।
ધર્માય ભક્ત્યૈ કૃષ્ણાય હરયે ચ નમો નમઃ ॥ ૨૬॥

નરાય તત્પૂર્વજાય વૃષજેભ્યો નમો નમઃ ।
દિક્પાલેભ્યઃ સમસ્તેભ્યો લોકપાલેભ્ય આનમઃ ॥ ૨૭॥

ગુરુભ્યો મોક્ષદેભ્યશ્ચ શાન્તિદેભ્યો નમો નમઃ ।
પાલકેભ્યઃ પવિત્રેભ્યઃ પાવનેભ્યો નમો નમઃ ॥ ૨૮॥

પાવકેભ્યશ્ચ તત્ત્વેભ્યશ્ચૈશ્વર્યેભ્યો નમો નમઃ ।
સર્વાભ્યો બ્રહ્મવિદ્યાભ્યો મુક્તિદાભ્યો નમો નમઃ ॥ ૨૯॥

ગુર્વીભ્યઃ કામધેનુભ્યઃ સદ્ભ્યો મુહુર્નમો નમઃ ।
તાપસેભ્યઃ શીલધર્મિભ્યો યોગિભ્યો નમો નમઃ ॥ ૩૦॥

સર્વાત્મનેઽનાદિકૃષ્ણનારાયણાય તે નમઃ ।
સ્વતઃપ્રકાશરૂપાય મન્ત્રાણાં નિધયે નમઃ" ॥ ૩૧॥

એતે બ્રહ્મસ્વરૂપાસ્તાન્ કીર્તયેત્ કીર્તિવર્ધનાન્ ।
અવતારાઁસ્તથા મુક્તાનીશ્વરાન્ કીર્તયેત્ સુરાન્ ॥ ૩૨॥

શ્રીકૃષ્ણં પરમં બ્રહ્મ સર્વશાસ્ત્રપ્રબોધિતમ્ ।
મઙ્ગલં સર્વભૂતાનાં પવિત્રં કીર્તયેદ્ધિ મામ્ ॥ ૩૩॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૯૫-અધ્યાયાન્તર્ગતં પુરુષોત્તમપ્રોક્તં સર્વદેવાદિસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૯૫/૧૩-૩૩॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 95/13-33..

Proofread by PSA Easwaran

*Purushottamaproktam Sarvadevadi Stotram*

pdf was typeset on February 28, 2026

Please send corrections to *sanskrit@cheerful.com*